सारस्वत निबन्धावली

# अभिनन्दनग्रन्थ



विद्यावाचस्पति

## डॉ. उमारमण झा

# सारस्वतनिबन्धावली

## विद्यावाचस्पति डॉ. उमारमणझा अभिनन्दन ग्रन्थः

सम्पादकः

डॉ. धनिरामशास्त्री

**सम्पादकमण्डल**

1. डॉ. बटोही झा
2. डॉ. विजय पाल शास्त्री
3. डॉ. के. भरतभूषण
4. डॉ. सतीरमण झा
5. डॉ. रामलखन पाण्डेय
6. डॉ. जी.एस.आर. कृष्णमूर्ति
7. डॉ. किशोरी रमण झा
8. डॉ. भारत भूषण त्रिपाठी
9. पं. श्री विमलेश झा

# वाल्मीकीयरामायणे ज्योतिःशास्त्रीयतत्त्वम्

भवनाथ झा

भारतीयानामार्याणां दिव्यज्ञानविषयीभूतानां वेदानामङ्गत्वात् भगवतो वेदपुरुषस्य नेत्रत्वाच्च ज्योतिःशास्त्रस्यापि वेदवदपौरुषेयता प्राचीनता च स्वीकृता पुण्यश्लोकैर्महर्षिभिः वेदविद्भिः ''एवमिमे सर्वे वेदाः निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वयाख्याताः सपुराणाः सस्वराः'' इति सामगोपथब्राह्मणोक्तेः। तत्र इतिहासानुशीलनस्य अवकाश एव नास्ति। किन्तु यदि शास्त्राणां पौरुषेयतापक्षे विविधैरन्तःसाक्ष्यबहिःसाक्ष्यैः कालक्रममधिकृत्य पौर्वापर्यनिर्णयः क्रियते। तत्र कतिपयैराधुनिकैः आङ्गलविद्वद्भिः अस्मद्देशप्रसूतैश्चाङ्गलभक्तैः विद्वद्भिः ज्योतिशास्त्रस्य विशेषतः फलितस्य अर्वाचीनता सूचिता। डा० नेमिचन्द्रशास्त्री महोदयः जी.आर.के. इति नामधेयस्य विदुंषो 'हिन्दू एस्ट्रोनोमी' इति ग्रन्थं पूर्वपक्षतया उद्धरति[1] यत्- भारते टॉलमी महाशयस्य ज्योतिःसिद्धान्तस्तु अर्वाचीनकाले परिगृहीतः, किन्तु प्राचीनयूनानराष्ट्रियाणां सिद्धान्तानां परम्परायाः निर्वहणं प्राचीनकालादेव क्रियते। भारतीयज्योतिःशास्त्रस्य मूलभूताः सिद्धान्तास्तु यवनानां सम्पर्कैरेव प्रस्फुटिताः। किं बहुना, राशीनां नामान्यपि न सन्ति भारतीयानीति।

गुणाकरमुले महोदयोऽपि इतिहासतत्त्ववेत्ता एवमेव स्वीकरोति यत्- राशीनां नामानि फलितज्योतिःशास्त्रञ्च भारते प्रायेण सिकन्दरस्याक्रमणकाले पश्चादपि शकानामाक्रमणकाले तैः वैदेशिकैः सह प्रसृतानीति[2]। तेषां मतेन महाभारते राशीनामनुल्लेखादयं निष्कर्षः प्राप्यते।

परमियं युक्तिः सम्यक्प्रकारेणानुशीलनेन खण्डिता जायते। यदि नाम महाभारते मेषादीनां राशीनां नामानि नैवोपलभ्यन्ते, तेन एतेषां विदेशादायातत्वन्तु न सिद्ध्यति, महाभारतादपि प्राचीनतरे वाल्मीकीयरामायणे आदिकाव्ये होरा-संहिता-शकुन-सामुद्रिक-स्वप्नविचारैः सह राशीनामप्युल्लेखात्। किञ्च अनेन फलितज्योतिःशास्त्रस्यापि प्राचीनता सिद्ध्यति। तस्मादत्र निबन्धे रामायणोक्तानि ज्योतिःशास्त्रीयतत्त्वानि समाहृत्य एतेषां प्राचीनता प्रदर्श्यतेऽस्माभिः। वर्तमानरामायणे उत्तरकाण्डस्य अर्वाचीनता प्रक्षिप्तता च प्रतिपादिता याकोबीप्रभृतिभि र्बहुभिरैतिहासिकैः[3], अतस्तदंशमपहायैवात्र तत्त्वानि संगृह्यन्ते।

महर्षिवाल्मीकिकृतं रामायणन्तु लक्षश्लोकात्मकात् महाभारतात् प्राचीनतरमित्यत्र प्रायेण सर्वे ऐतिहासिकाः ऐकमत्यमवलम्बन्ते। एतेषां मतानि निपुणं निरीक्ष्य आचार्याः बलदेवोपाध्यायाः कथयन्ति यत्-[4] वर्तमानं महाभारतं न केवलं रामाख्यानेन युक्तमपि तु वाल्मीकीयरामायणमपि सुतरां परिचिनोति। रामायणे महाभारतीयानां पात्राणामुल्लेखः क्वचिदपि न प्राप्यते, परं वनपर्वणि महाभारते रामोपाख्यानं वाल्मीकिप्रोक्तस्य रामाख्यानस्य संक्षिप्तसंस्करणमस्ति। रामचन्द्रेण सम्बद्धानि स्थानानि महाभारते तीर्थानि प्रतिपादितानि सन्ति। शृङ्गवेरपुरं, गोप्रतारश्च वनपर्वणि तीर्थत्वेन प्रतिपादिते स्तः। एवं महाभारतस्य वर्तमानस्वरूपप्राप्तेः पूर्वं रामायणं प्राचीनग्रन्थरूपेण प्रमाणितमासीत्। महाभारतस्य वर्तमानं स्वरूपं ख्रीष्टाब्दस्य आरम्भे सञ्जातम्। अतः रामायणस्य रचना एतस्मात् पूर्वमवश्यमेव भूतं स्यात्।'' त एवाचार्याः रामायणस्य रचनाकालं प्रतिपादयन्तः कथयन्ति यत्-''[5] एभिः प्रमाणैः सिद्ध्यति यत् रामायणस्य रचना बुद्धस्याविर्भावात्पूर्वमिवाभूत्। अर्थात् रामायणस्य ख्रीष्टाब्दात् पञ्चशताब्दपूर्ववर्तित्वस्वीकरणं न्याय्यमिति।

एतस्मिन् वाल्मीकीयरामायणे न केवलं द्वादशराशीनामुल्लेखः, अपि तु जन्मलग्नं विनिश्चित्य भावानामपि गणनायाः सङ्केतः प्राप्यते। ग्रहाणामुच्चैः नीचैश्च स्थानेषु अवस्थानमपि तत्र गणितम्।

**किञ्च नक्षत्रदेवताविचारः लग्ने ग्रहयोः युतिश्च तत्र स्पष्टं निरूपितम्।** रामादीनां भ्रातृणां **जन्मकालवर्णने–**

**ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।**
**ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ।।८ ।।**
**नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ।**
**ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ।।९ ।।**
**पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।**
**सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ।।१५ ।।** बालकाण्डम् सर्गः १८

रामचन्द्रस्य जन्मकाले लग्ने चन्द्रमसि स्थिते जन्मराशिः कर्कः । अदितिदैवत्ये पुनर्वसुनक्षत्रे **चतुर्थचरणे** चन्द्रः कर्कराशौ भवतीति विचारोऽपि अत्र दृश्यते। एवं रामस्य राज्याभिषेकोपक्रमे **अयोध्याकाण्डे दशरथोक्तौ–**

**उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि ।**
**लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ।।१३ ।।**
अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम् ।।१४ ।।अयोध्या. सर्गः १५

अत्र जन्मलग्ने गोचरे सति राज्याभिषेकमुहूर्तः **शुभ इति प्रतिपादितम्।** अथ च **तत्रैवायोध्याकाण्डे** जन्मनक्षत्रे अर्थात् चन्द्रमसः राशौ सूर्यमङ्गलराहूणां युतिः **गोचरीभूता मृत्युयोगं** सूचयतीति दशरथस्य मृत्युप्रसङ्गे उक्तम्–

**अवष्टब्धं च मे राम नक्षत्रं दारुणग्रहैः ।**
**आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ।।१८ ।।**
**प्रायेण च निमित्तानामीदृशानां समुद्भवे ।**
**राजा हि मृत्युमाप्नोति घोरां चापदमृच्छति ।।१९ ।।** अयोध्या. सर्गः ४

रामायणे ग्रहाणां मित्रताशत्रुताविचारश्च उपलभ्यते। रामलक्ष्मणयोः **वनगमनप्रसङ्गे** उपमाच्छलेन आदिकविनोक्तम्–

**ततः सुमन्त्रेण गुहेन चैव समीयतुः राजसुतावरण्ये ।**
**दिवाकरश्चैव निशाकरश्च यथाम्बरे शुक्रबृहस्पतिभ्याम् ।।४१ ।।**अयोध्या. सर्गः ११

अत्र रामलक्ष्मणौ सूर्यचन्द्राभ्यामुपमितौ तेन उभयोः **नैसर्गिकमित्रता सूचिता । गुहसुमन्त्रौ च** क्रमेण बृहस्पतिशुक्राभ्यामुपमितौ। अनयोः परस्परं मित्रताऽभावेऽपि **कार्यमेकमुद्दिश्य युतिः** सङ्केतिता ।

**अथ च** किष्किन्धाकाण्डे **बुधमङ्गलयोः** शत्रुतां निरूप्य **तयोर्युद्धमुपमानत्वेन वर्णयति–**

**ततः सुतुमुलं युद्धं बालिसुग्रीवयोरभूत् ।**
**गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव ।।१७ ।।** किष्किन्धा. सर्गः १२

बुधः चन्द्रमसः पुत्रः । रोहिणी च चन्द्रमसः प्रिया। तेन बुधः रोहिण्याः पुत्रः सन् रोहिणीं कामयमानः अगम्यगन्ता कल्पितः इति ज्योतिःशास्त्रे प्रसिद्धम्। एतत् वर्णितम्महर्षिणा **सीताहरणप्रसङ्गे–**

**अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः ।**
**जग्राह रावणः सीतां बुधः खे रोहिणीमिव ।।१६ ।।**अरण्य. सर्गः ४९

रोहिणीचन्द्रमसोः सम्बन्धन्तु सीतारामयोः प्रसङ्गे बहुधा वर्णयति वाल्मीकिः–

**यथा शची महाभागा शक्रं समुपतिष्ठति ।**
**अरुन्धती वसिष्ठश्च रोहिणी शशिनं यथा ।।१० ।।** सुन्दर. सर्गः २४

**तथा च सीतां प्रति हनूमतः उक्तावपि–**

**पृष्ठमारोह मे देवि! मा विकाङ्क्षस्व शोभने ।**
**योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी ॥३६ ॥**
**कथयन्तीव शशिना सङ्गमिष्यसि रोहिणी ॥३७ ॥** सुन्दर. सर्गः ३७

अनेकत्र सीतायाः उपमानत्वे रोहिणी वर्णिता–

**किं नु चन्द्रमसा हीना पतिता विबुधालयात् ।**
**रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणाधिका ॥७ ॥**सुन्दर. सर्गः ३३

अरण्यकाण्डेऽपि शूर्पणखा सीतां हन्तुं तां प्रति धावति तत्र कविः उपमिमीते–

**इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा ।**
**अभ्यगच्छत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥१७ ॥**अरण्य. सर्गः १८

रामायणे शुभाशुभमुहूर्तानामपि चर्चा प्राप्यते। यद्यपि मुहूर्तशब्दस्य प्रयोगः सामान्यतः अल्पकालाभिव्यञ्जकत्वेन कृतः, यथा–स मुहूर्तमिव ध्यात्वा, इत्यादिषु किन्तु दिनमानस्य पञ्चदशविभागात्मकोऽपि मुहूर्तशब्दः बहुषु स्थलेषु प्रयुक्तः। मुहूर्तशब्देन ज्योतिःशास्त्रे दिनस्य रात्रेर्वा पञ्चदशो विभागः उच्यते। यथोक्तं रत्नमालायाम्– ''दिनस्य यः पञ्चदशो विभागो रात्रेस्तथा तद्धि मुहूर्तमान''मिति। एतेषां नामानि सन्ति–

**रुद्रः श्वेतश्च मैत्रश्च तथा गौरभटस्ततः ।**
**सावित्रो विजयश्चैव गन्धर्वः कुतपस्तथा ॥**
**रौहिणोऽथ विरञ्चश्च सोमोऽथ निर्ऋतिस्तथा ।**
**माहेन्द्रो वरुणश्चैव भटः पञ्चदशः स्मृतः ॥**
**अह्नो मुहूर्ता विख्याता दश पञ्च च सर्वदा ॥** इति ।

तेषां देवताः अपि मुहूर्तचिन्तामणौ उक्ताः[६]–

**गिरिशभुजगमित्राः पित्र्यवस्वम्बु विश्वे-**
**ऽभिजिदथ च विधातापीन्द्र इन्द्रानलौ च ।**
**निर्ऋतिरुदकनाथोऽप्यर्यमाऽथो भगः स्युः**
**क्रमश इह मुहूर्ताः वासरे बाणचन्द्राः ॥**

एवं दिने तृतीयो मुहूर्तः मित्रदैवत्यः मैत्रः कथ्यते। नदीसंतरणप्रसङ्गे अस्य नामोल्लेखः महर्षिणा कृतः।

**सा पुण्या ध्वजिनी गङ्गा दाशैः संतारिता स्वयम् ।**
**मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम् ॥२१ ॥**अयोध्या. सर्गः ८९

अथ चान्वर्थके विन्दमुहूर्ते नष्टवस्तुनः पुनर्लाभं विचारयति–

**येनायाति मुहूर्तेन सीतामादाय रावणः ।**
**विप्रणष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥१२ ॥**
**विन्दो नाम मुहूर्तोऽसौ न च काकुत्स्थ सोऽबुधत् ।**
**झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥१३ ॥**अयोध्या. सर्गः ६८

नूतनगृहे प्रवेशमुहूर्तं विचारयन् यद् ब्रूते श्रीपतिः– ''शुभः प्रवेशो मृदुभिर्ध्रुवाख्यै''रिति तदेव रामायणेऽपि पञ्चवटीवने रामादीनां गृहप्रवेशप्रसङ्गेऽप्युक्तम्। रामः लक्ष्मणं निर्दिशति–

**ऐणेयं श्रपयस्वैतच्छालां यक्ष्यामहे वयम् ॥२५ ॥**
**त्वर सौम्यमुहूर्तोऽयं ध्रुवश्च दिवसो ह्ययम् ॥२६/क ॥**अयोध्या. सर्गः ५६

सीतारामयोः विवाहप्रसङ्गे शुभमुहूर्तं विचारयति–

**मघा ह्यद्य महाबाहो तृतीयदिवसे प्रभो ।**
**फल्गुन्यामुत्तरे राजंस्तस्मिन् वैवाहिकं कुरु ॥**

रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदयम् ॥२४॥बाल. सर्गः ७१

युद्धार्थं प्रस्थितानां राज्ञां कृते शुभमुहूर्तस्यावश्यकताऽपि प्रतिपादिता–

**एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् ।**
**मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥३४॥**युद्ध. सर्गः ३

तत्रैव युद्धयात्रायां शुभमुहूर्त एवमुक्तः–

**उत्तराफल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते ।**
**अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥१५॥**युद्ध. सर्गः ४

अशोकवाटिकायां दिने दिने क्षीयमाणां सीतां वर्णयन् अनध्यायमुहूर्तस्य सङ्केतं करोति महर्षिः–

**सा प्रकृत्यैव तन्वङ्गी त्वद्वियोगाच्च कर्शिता ।**
**प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥३१॥**सुन्दर. सर्गः ५९

श्रीरामं प्रति हनूमतोऽस्यामुक्तौ प्रतिपत्तिथौ पाठे विद्या क्षीयते इति विमर्शं मत्वा अनध्यायः अधुनाऽपि प्रवर्तते क्वचित् ।

वास्तुभूमेः चयनविमर्शे 'पूर्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः' इति सिद्धान्तः वास्तुशास्त्रे प्रसिद्धः । तथा च ''दक्षिणे पश्चिमे चैव नैर्ऋते वायुकोणके । एभिरुच्चैर्भवेत्स्थानो गजपृष्ठो विधीयते ॥ गजपृष्ठे भवेद्वासः सलक्ष्मीर्धनवान्भवेत् । आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः'' इति ।[४] रामायणेऽपि रामः तदेव कथयति–

**प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति ।**
**पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति ॥१२॥** किष्किन्धा. सर्गः २७

रामायणे युद्धकाण्डे अष्टाविंशतितमे सर्गे श्लोकाङ्क ३३ तः ३७ पर्यन्तम् रामानुगन्तॄणां सैन्यानां संख्यानिरूपणप्रसङ्गे शतेन गुणिताः सर्वाः संख्याः अभिहिताः । एतासु अन्तिमा त्रयोविंशत्यङ्कात्मिका गृहीता । यद्यपि एताः केवलं सैन्यगणनायां प्रयुक्ताः सन्ति तथाप्यत्रोक्तानां वैज्ञानिकता विपुलता च गणितज्योतिःशास्त्रीयतां साधयति । ताः घाताङ्कवासनया आधुनिकरीत्या सुबोधाय प्रदर्श्यन्ते–

| | | |
|---|---|---|
| १०० | = $१०^{२}$ = | शतम् |
| $१०^{२}$ x१०० | = $१०^{४}$ = | कोटिः |
| $१०^{४}$ x१०० | = $१०^{६}$ = | शङ्कुः |
| $१०^{६}$ x१०० | = $१०^{८}$ = | महाशङ्कुः |
| $१०^{८}$ x१०० | = $१०^{१०}$ = | वृन्दम् |
| $१०^{१०}$ x१०० | = $१०^{१२}$ = | महावृन्दम् |
| $१०^{१२}$ x१०० | = $१०^{१४}$ = | पद्मम् |
| $१०^{१४}$ x१०० | = $१०^{१६}$ = | महापद्मम् |
| $१०^{१६}$ x१०० | = $१०^{१८}$ = | खर्वम् |
| $१०^{१८}$ x१०० | = $१०^{२०}$ = | समुद्रम् |
| $१०^{२०}$ x१०० | = $१०^{२२}$ = | महौघम् इति । |

शकुनशास्त्रीयतत्त्वानि रामायणे अतिशयेनोपलभ्यन्ते । क्वचित्तु पृथक् सर्ग एव शकुनविमर्शमधिकृत्य महर्षिणा प्रणीतः । यथा अरण्यकाण्डस्य त्रयोविंशे सर्गेऽशुभानि, सुन्दरकाण्डस्य एकोनत्रिंशे सर्गे शुभानि शकुनानि विशदरूपेण वर्णितानि सन्ति । युद्धकाण्डस्य त्रयोविंशे सर्गे आरम्भात् एकादशश्लोकपर्यन्तम् चतुर्थसर्गेऽष्टौ श्लोकाः पुनः तत्रैव एकचत्वारिंशे सर्गे एकादशश्लोकात् विंशश्लोकपर्यन्तमशुभानि शकुनानि कथितानि । एभिः रामायणस्य

रचनाकाले शकुनविचारस्य बद्धमूलताऽपि सुतरामवगम्यते। अस्यावश्यफलदत्वमपि रामायणे स्पष्टमाकूतम्–

**निमित्तं लक्षणं स्वप्नं शकुनिस्वरदर्शनम्।**

**अवश्यं सुखदुःखेषु नराणां परिदृश्यते ॥२॥**अरण्य. सर्गः ५२

शुभशकुनेषु दक्षिणभागे मृगगमनम् (बाल. ७४/१३) वंचुलकपक्षिणो रवः (अयो. ६१/२३) स्त्रीणां वामनयनस्फुरणम् (सुन्दर. २९/२), स्त्रीणां वामबाहुस्फुरणम् (सुन्दर. २९/३) स्त्रीणामूरुस्पन्दनम् (सुन्दर २९/४) स्त्रीणां वस्त्रपरिभ्रंशनम् (सुन्दर. २९/५) इत्यादीनि उक्तानि सन्ति। तथा चाशुभेषु पक्षिणां घोररवः (बाल. ७४/१२) पुरुषस्य बाहुकम्पनम् (अयो. ६१/२१) गृध्रानां रवः (अरण्य. ५७/४) स्वर्णवृक्षदर्शनम् (अरण्य. ४७/३८, ५३/१९, ६८/११), कलुषितवायुवेगः, पर्वतशिखरकम्पः, वृक्षपतनम् रक्तवर्णा वृष्टिः, अतिशयेन रक्तिममण्डिता सन्ध्या, सूर्यमण्डलादग्निवृष्टिः, मृगपक्षिणामार्तस्वरः सूर्योन्मुखानां मृगपक्षिणां रवः, चन्द्रमसो म्लानता, सूर्ये नीलं चिह्नम्, काकश्येनगृध्राणां नीचैः पतनम्, शिवाद्याः रोदनम् (अरण्य. सर्गः २३) इत्यादीन्युक्तानि सन्ति। रामायणे शकुनमित्यर्थे सर्वत्र निमित्तमिति शब्दः प्राप्यते, यथा– ''निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च'' (अरण्य ५७/४) शुभां निमित्तानि शुभानि भेजिरे (सुन्दर. २९/१)। एतदतिरिक्तमेकस्मिन् स्थले (अरण्य. ५२/२) प्रागुक्ते शकुने पक्षिणां स्वरेण शुभाशुभपरिज्ञानमुक्तम्। एवं प्रतीयते यत् रामायणकाले निमित्तशास्त्रं शकुनिस्वरदर्शनशास्त्रञ्च पृथक् आस्ताम्। पश्चाच्चोभयोः कृते शकुनमित्युपलक्षणपरं पदं प्रयुक्तम्। यच्च शास्त्रं ज्योतिषि पञ्चस्कन्धात्मके परिगृहीतम्।

अरण्यकाण्डस्य पूर्वोक्त एव श्लोके 'लक्षणमिति' पदमुक्तम्। प्रतीयते यदिदं पदं सामुद्रिकशास्त्रं सङ्केतयति। शरीरावयवानां दर्शनेन शुभाशुभज्ञानात्मकं शास्त्रमिदं प्राचीनैरर्वाचीनैश्च तत्त्वविद्भिः निपुणं परीक्षितम्। हस्तरेखाविचारोऽपि अस्यैव व्याप्यभूतः। रामायणे कतिपयेषु स्थलेषु अस्य लक्षणशास्त्रस्य उल्लेखोऽस्ति। बालकाण्डस्य मूलरामायणाख्ये प्रथमसर्गे नारदोक्त्या रामचन्द्रवर्णने पुरुषस्य शुभलक्षणान्युक्तानि–

**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥९॥**

**महोरस्को महेष्वासो गूढजत्रुररिन्दमः।**

**आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥१०॥**

**समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्।**

**पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥११॥**बाल. सर्ग. १

एवं च रक्षसामपि रूपवर्णने समापतिता विचित्रता लक्षणशास्त्रदिशा विवेचनीया अनुसन्धेया च प्रतीयते।

रामायणे महोत्पातवर्णनमपि अनल्पमुपस्थापितम्। रोहिण्यामुल्काप्रहारः (अरण्य. १८/१७) सनिर्घातदिवोल्कापातः (अयो. ४/१७), वज्रपातः, दिग्दाहः इत्यादयो महोत्पाताश्च अशुभनिमित्ततया वर्णिताः, यथा खररामयोः युद्धकाले–

**जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः।**

**प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥१२॥**

**उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः ॥१३/क॥** अरण्य. सर्गः २३

आकाशे ग्रहनक्षत्राणां निर्दीप्त्या दीप्त्या च शुभाशुभज्ञानस्य एका विचारणा रामायणे दृश्यते। युद्धकाण्डस्य चतुर्थसर्गे निर्ऋतदैवत्यं पूर्वाषाढनक्षत्रं म्लानं वीक्ष्य राक्षसानां विनाशमथ च पैतामहं रोहिणीनक्षत्रं, त्रिशङ्कुं, सप्तर्षिमण्डलं, सूर्यदैवत्यं ज्येष्ठानक्षत्रं च प्रदीप्तानि वीक्ष्य रामानुगमनकर्तॄणामभ्युदयो निरूपितः। तत्र अष्टौ श्लोकाः ज्योतिःशास्त्रपरकाः

गूढमनुसन्धेयाः। एवमेव युद्धकाण्डस्य त्र्युत्तरशततमे सर्गे रामरावणयोः प्रत्यक्षयुद्धे रूपकालङ्कारमुखेन ग्रहेषु परस्परप्रहारवर्णनं कृतम्, तदपि सिद्धान्तज्योतिःशास्त्रदृष्ट्या सम्यगनुसन्धेयम्। तदस्माभिः सम्यक् नावगतम्।

पञ्चस्कन्धात्मकाज्ज्योतिषो बहिर्भूतोऽपि स्वप्नविचारः अदृष्टफलाफल ज्ञानोपकारकत्वात् रामायणे निमित्तादिषु चतुर्षु (अरण्य ५२/२) स्वप्नस्यापि उल्लेखत्वात् अत्रास्यापि विवेचनं क्रियते। अयं विमर्शः रामायणे विशदं प्राप्यते। अयोध्याकाण्डस्य ऊनसप्ततितमे सर्गे भरतेन वर्णितं दुःस्वप्नं महत्त्वपूर्णमस्ति।

तत्र स कथयति यत् मलिनं, रक्तकेशिनं, पर्वताग्रात् पतन्तं, गोमये ह्रदे प्लवमानं, तैलमञ्जलिना पिबन्तं, तिलौदनं भुञ्जानं, मुहुर्मुहुर्हसन्तं, तैलाभ्यक्ताङ्गं, तैलेऽवगाहमानं पितरं स्वप्नेऽहमद्राक्षम्। तथा च शुष्कं सागरं, भुवि निपतितं चन्द्रमसं, जगतीं तमसोपरुद्धां, बाह्यस्य गजस्य शकलीभूतं विषाणं, दिग्दाहं, विदीर्णां पृथ्वीं, शुष्कान् द्रुमान्, विध्वस्तान् पर्वतांश्च अहमद्राक्षम्। स्वप्ने मया कृष्णलौहमये पीठे कृष्णवासा राजा कृष्णपिङ्गलाभिः स्त्रीभिः सन्ताडितो दृष्टः। स्वप्ने रक्तमाल्यानुलेपनो धर्मात्मा त्वरमाणो दृष्टः। सः गर्दभयुक्तेन रथेन दक्षिणां दिशमगच्छत्। राजानं तु काचित् रक्तवासिनी विकृतानना राक्षसी प्रकर्षन्ती दृष्टा। तथा चान्ते–

एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम्।
**अहं रामोऽथवा राजा लक्ष्मणो वा मरिष्यति ॥१७॥**
**नरो यानेन यः स्वप्ने खरयुक्तेन याति हि।**
**अचिरात्तस्य धूमाग्रं चितायां संप्रदृश्यते ॥१८॥**अयोध्या. सर्गः ६९

अथापि–

**''स्वप्नो मयायं विकृतोऽद्यदृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः ॥''**सुन्दर. सर्गः ३२/१
**नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम्।**
**न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥२२॥**सुन्दर. सर्गः ३४

इत्यादिषु स्थलेषु स्वप्नविचारो रामायणे प्राप्यते।

एवमल्पैरेव शब्दैः वाल्मीकीयरामायणे ज्योतिस्तत्त्वानि संगृहीतानीति तत्र विद्वांसः प्रमाणम्।

## सन्दर्भ सङ्केतः


१. भारतीय ज्योतिष–डा० नेमिचन्द्र शास्त्री। भारतीय ज्ञानपीठ प्रकाशन।
संस्करण १९९८ पृष्ठ सं. २७
२. आकाश दर्शन : गुणाकर मुले, राजकमल प्रकाशन, दिल्ली
३. संस्कृत साहित्य का इतिहास : आचार्य बलदेव उपाध्याय, संस्करण १९८७ पृष्ठ २४
४. तत्रैव पृष्ठ–२६
५. तत्रैव पृष्ठ–२७
६. मुहूर्त चिन्तामणिः, विवाह प्रकरणम् श्लोकः–५२
७. म. म. पशुपतिकृता व्यवहाररत्नावली। हस्तलिखिता। लेखकस्याधिकारे उपलब्धा।

आकरग्रन्थः– वाल्मीकीयरामायणम्। क्षेमराज–श्री कृष्णदास श्रेष्ठिना स्वकीये श्रीवेंकटेश्वर (स्टीम्) मुद्रणालये प्रकाशितम्। ब्रह्मपत्रात्मकम्। १९२३ ई.



ग्रा. पत्रा.–हटाढ–रुपौली,
द्वारा–झंझारपुरम्,
मण्डलम्–मधुबनी (बिहारः)